International Journal of Multidisciplinary Horizon

ISSN:**3049-2017**
IJMH 2025; 2(5): 26-29
© 2025 IJMH
www.themultijournal.com
Received: 10-09-2025
Accepted: 16-09-2025
Publish : 19-09-2025

**Gaurav Gaur**
Assistant professor (guest faculty),
Department of Sanskrit,
Jai narain vyas university,
jodhpur, Rajasthan.

**Correspondence:**
**Gaurav Gaur**
Assistant professor (guest faculty),
Department of Sanskrit,
Jai narain vyas university,
jodhpur, Rajasthan.

# शाब्दिकाभिनये वर्णोच्चारणशिक्षानिरूपणम्

**गौरवः गौड़ः**

**शोधसारांश-** संस्कृतवाङ्गये वेदानां स्थानं सर्वोपरि वर्तते। अर्थावगमनाय मन्त्रेषु उच्चारितवर्णानां उच्चारणज्ञानमावश्यकम्। अस्माकं भारतदेशे प्रचलिताः विविधाः भाषाः अस्माकं संस्कृतेरुदात्त-परम्पराभ्यः उत्कृष्ट वेदादिज्ञानाय, विपुलसाहित्यसंरक्षणाय, नवज्ञानसृजनाय चावश्यकाः। संस्कृत-वाङ्गमये प्रयुक्तानां शब्दानां शुद्धाशुद्धयोः विचारः येन शास्त्रेण क्रियते तद्धि व्याकरणम्। व्याकरणस्य केन उपायेन व्याक्रियते शब्दान्? पतञ्जलिना उक्तम्- **"न हि शब्देन किञ्चिद् व्याक्रियते। केन तर्हि। सूत्रेण। सूत्रत एव हि शब्दान् प्रतिपद्यन्ते"**[1] । अर्थात् व्याकरणसूत्रेण हि शब्दानां शुद्धाशुद्धयोः विचारः क्रियते। एतदर्थं वार्तिककारेण कात्यायनेन प्रोक्तम्- **'लक्ष्यलक्षणं व्याकरणम्'**[2]। साधुशब्दस्य ज्ञानं व्याकरणशास्त्रस्य साक्षात् प्रयोजनत्वादेव। साधुशब्द उत शब्दोऽस्ति लक्ष्यः। लक्ष्यमिदञ्च शब्दं सूत्रेण ज्ञायते इति सूत्रमस्ति लक्षणम्। सामान्यतः काचित् भाषां शुद्धरूपेण वक्तुं लेखितुं च य उपायः गृह्यते तं व्याकरणमुच्यते। अतएव व्याकरणेन ध्वनिविवेचनं शब्दविवेचनम् अर्थविवेचनं तथा वाक्यविवेचनं क्रियते । शुद्धोच्चारणं, शुद्धप्रयोगः, अर्थज्ञानम्, अनुवादः शब्दभण्डारम् इत्येवं बहुविधप्रयोजनस्य कृते अस्माभिः व्याकरणं पठनीयम्।

**संकेतशब्दाः-** वर्णाः, उच्चारणम्, प्रयत्नं, स्थानं, ज्ञानं, ध्वनिविवेचनं, प्रासंगिकता।

**उद्देश्यानि-**

- साधुशब्दस्य ज्ञानं व्याकरणशास्त्रस्य साक्षात् प्रयोजनत्वात् वर्णोच्चारणशिक्षानुशीलनम्।
- शिक्षादिषु ग्रन्थेषु वर्णसंख्याविषये मतैक्यानुशीलनम्।
- वैदिकज्ञानपरम्परायां ऋषिमहर्षीणाम् उच्चारणविषये मतानुशीलनम्।

**शोधविधिः-** शोधपत्रमिदं प्राचीनार्वाचीनान् ग्रन्थानधिकृत्य विषयवस्तु संचित्य च विधास्यते। शोधप्रबन्धोऽयं मुख्यतया व्याख्यानपरः परं तौलनिकमपि। प्रायः तदनुसारेणैव गुणात्मकेऽनुसंधाने विश्लेषणात्मकपद्धतिः आश्रीयते।

**प्रस्तावना-**

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**[3]

ॐ शब्दब्रह्मणे नमः। आसंसारं कस्यापि ज्ञानस्य विज्ञानस्य वा आद्यसोपानं भवति **वर्णशिक्षणम्**। वर्णः भाषायाः लघुत्तमो अवययो भवति यस्य विखण्डनं भवितुं न शक्नोति यथा 'राम' अस्मिन् प्रातिपदिके **र्+आ+म्+अ** एते चत्वार अखण्डाः ध्वनयः। एतेषां विखण्डनं न भवितुं शक्नोति अतः एतैव वर्णाः सन्ति। महाभाष्यानुसारेण यस्य क्षरणं विनाशं वा न भवति तदक्षरं, वण्यते दीप्यते अनेनेति वर्णः अक्षरपर्यायः। सः वर्णः सामान्यतया द्विविधाः ध्वन्यात्मकः अक्षरात्मकश्च। **'शिक्ष अभ्यासे'** अस्मात् धातोः **'गुरोश्चहलः'**[4] इत्यनेन सूत्रेण **अ** प्रत्ययेन शिक्षाशब्दस्य सिद्धिर्जायते।

स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा। वर्णानां शिक्षा वर्णशिक्षा तत्पुरुषसमासोऽयमिति। वर्णशिक्षायै वेदाङ्गेषु शिक्षाङ्गः प्रतिपादितवन्तः भारतीयमहर्षयः। यस्मिन् वर्णज्ञानं वर्णोच्चारणज्ञानं तथा एतेसम्बन्धिताः बहवः विषयाः विवेचिता आचार्याः।

**वर्णसंख्या-** अस्माकं शिक्षादिषु ग्रन्थेषु वर्णसंख्याविषये मतैक्यं न वर्तते, अर्थात् संख्याभेदाः प्राप्यन्ते यथा स्वामिना दयानन्देन वर्णोच्चारणशिक्षाग्रन्थे त्रिषष्टिः वर्णाः स्वीकृताः ते अकारादिषु वर्णेषु विभक्ताः पाणिनिशिक्षायाः **'त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः**[5] पङ्क्त्यानुसारेण त्रिषष्टि (६३) अथवा चतुर्षष्टिः (६४) वर्णाः भवन्ति।

**स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।**
**यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥**
**अनुस्वारो विसर्गश्च ×क ×पौ चापि पराश्रितौ ।**
**दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च॥**[6]

उपरोक्त श्लोकानुसारेण स्वेन राजन्ते विराजन्ते निरपेक्षतया उच्चार्यन्ते इति **स्वराः**। द्वाविंशतिसंख्याकाः स्वरभेदाः ह्रस्व-दीर्घ-प्लुतसंज्ञाभेदेन प्रपञ्चिताः। कवर्गतः उष्मसंज्ञकपर्यन्ताः ये त्रयस्त्रिंशत् वर्णाः **ते व्यञ्जनवर्णाः** सन्ति। तथा **विसर्जनीय-जिह्वामूलीय-उपधमानीय अनुस्वार- ह्रस्व-दीर्घ अनुनासिक लकारसंकेतः**। एते अष्टौ अयोगवाहा अपि वर्णेषु अङ्किता आहृत्य वर्णानां संख्या त्रिषष्टिः भवन्ति । एवं प्रकारेण विभिन्नेषु ग्रन्थेषु विभिन्नप्रकारेण संख्याभेदाः दृश्यन्ते।

**वर्णोच्चारणस्थानम्-** वाजसनेयप्रातिशाख्यस्य भाष्यकार उव्व-टोक्तिः- **अस्ति अधिकरणं वर्णानां स्थानशब्देनोच्यते**[7]। येभ्यः स्थानेभ्यः वर्णा उच्चार्यन्ते तानि **उच्चारणस्थानानि** कथ्यन्ते। अस्माकं वैदिकज्ञानपरम्परायाम् ऋषयः महर्षयश्च विशेषतया उच्चारण-विषये ध्यानं अददुः। ते शुद्धोच्चारणेन शिष्यान् शिक्षयन्ति स्म। शिष्या अपि गुरूणां शुद्धोच्चारणम् आत्मसात् कृत्वा अनुचरन्ति स्म। वर्णोच्चारणविषये अस्माकं प्रातिशाख्यादिषु शिक्षादिषु ग्रन्थेषु विशिष्टतया प्रतिपादितवन्तः आचार्याः। प्रातिशाख्यादिषु ऋक्प्रातिशाख्यः, शुक्लयजुः प्रातिशाख्यः तैत्तिरीयप्रातिशाख्यः, शिक्षादिषु पाणिनीयशिक्षा, याज्ञवल्क्यशिक्षा, आपिशलीशिक्षा-विषये अस्माभिरेतद्विषये अध्ययनं कर्तव्यम्। एतेषु शिक्षादिषु ग्रन्थेषु उच्चारणस्थानानां संख्याभेदाः दृश्यन्ते यथा शिक्षायां- १ उरस्थानम् २ कण्ठस्थानम् ३ शिरस्स्थानम् ४ तालुस्थानम् ५ दन्तस्थानम् ६ ओष्ठस्थानम् ७ जिह्वामूलस्थानम् ६ दन्तमूलस्थानं च एतानि उच्चारणस्थानानि कथ्यन्ते। एतेषु प्रथमस्थाने प्रयुक्त उरः शब्दं **डॉ. भोलानाथतिवारीमहोदयः** भाषाविज्ञानग्रन्थे कण्ठार्थे स्वीकरोति। तृतीयः शिरस् शब्दस्य मूर्धा इत्यर्थः न तु मस्तकः **'मूर्धास्थानम्'** कश्चिद् कण्ठतालुमध्यवर्तिस्थानमुच्यते, अपरे दन्ततालुमध्यवर्तिस्थानम् अनुशीलनेन ज्ञायते।

**पाणिनिशिक्षानुसारेण उच्चारणस्थानानि-**
**हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम्।**
**उरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुतम्॥**
**कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू।**
**स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥**
**जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतौ बुधैः।**
**एऐ तु कण्ठतालव्य ओऔ कण्ठोष्ठजौ स्मृतौ॥**[8]

**सिद्धान्तकौमुद्यानुसारेण वर्णोच्चारणस्थानम्-** आचार्यभट्टोजिदी-क्षितमहोदयः सिद्धान्तकौमुद्यां **"तुल्यास्यप्रयत्नं सवर्णम्**[9]**"** इति सूत्रस्य वृत्तौ वर्णानाम् उच्चारणस्थानानि प्रतिपादयति तानि निम्नाङ्किकतानि- '**अकुहविसर्जनीयानां कण्ठः, इचुयशानां तालुः, ऋटुरषाणां मूर्धा, लृतुलसानां दन्ताः, उपूपधमानीयानामोष्ठौ, ञमङणनानां नासिका च। एदैतोः कण्ठतालु, ओदौतोः कण्ठोष्ठम्, वकारस्य दन्तोष्ठम्, जिह्वामूलीयस्य जिह्वामूलम्, नासिकानुस्वारस्य"**[10] । वर्णोच्चारणे प्रयत्नः यत्नं यत्नः इति विग्रहे भ्वादिगणीय धातोः **"यजयाचयतविच्छप्रच्छरक्षो नङ्"**[11] अनेन सूत्रेण **नङ्** प्रत्ययः कृते सति निष्पद्यते यत्नशब्दोऽयं। ततः **'प्र'** इत्यस्य यत्नेन सह प्रादिसमासत्वाद् **प्रयत्नः** शब्दस्य सिद्धिः। यस्यार्थः प्रकृष्टोः यत्न अर्थात् वर्णोचारणस्य यत्नः विशेषः। वस्तुतः वर्णोच्चारणं प्रति प्रयत्नः करणं भवति तं विना वर्णोच्चारणः न संभवति वर्णोच्चारणे प्रयुक्तानां शरीरावयवानां व्यापारैव प्रयत्नोऽस्ति।

सिद्धान्तकौमुद्यानुसारेण प्रयत्नानां द्वौ प्रकारौ स्तः। प्रयत्नः द्विधा **आभ्यन्तरबाह्यश्च**। आभ्यन्तरप्रयत्नः **'अभि'** इत्यस्य अन्तर शब्देन साकं '**प्रादयो गताद्यर्थे प्रथमया'**[12] अनेन समासत्वात् आभ्यन्त-रशब्दः सम्पद्यते यस्यार्थः भवति अन्तरमभिगतमिति मध्यः, अन्तः, अन्तरालश्च अस्य पर्यायाः। आभ्यन्तरप्रयत्न इत्यत्र आभ्यन्तरशब्द आस्याभ्यन्तरवाचकः। **महाभाष्यानुसारेण** अस्य सीमा ओष्ठात् प्रभृतिः प्राक् काकलातीति। अतः स्पष्टमस्ति मुखविवरान्ते यः यत्नः वर्णोचारणाय भवति स आभ्यन्तरप्रयत्न उच्यते। विभिन्नेषु ग्रन्थेषु आभ्यन्तरप्रयत्नसंख्यासु अपि भेदाः दृश्यन्ते। यथा **ऋक्प्रातिशाख्ये** आभ्यन्तरप्रयत्नानां त्रयः भेदाः १ स्पृष्टः २ दुःस्पृष्ट ३ अस्पृष्टश्चेति। **स्पृष्टप्रयत्नः** स्पर्शसंज्ञकव्य-ञ्जनानामुक्तं, **दुःस्पृष्टप्रयत्नः** य र ल व इत्येषां वर्णानां कथितम्। **अस्पृष्टप्रयत्नः** स्वराणां, अनुस्वारस्य तथा ऊष्मवर्णानामुक्तम्।

वाजसनेयप्रातिशाख्यस्य भाष्यकारेण **उव्वटेन** आभ्यन्तरस्य कृते **आस्य** शब्दप्रयुक्तः। तथा आभ्यन्तरप्रयत्नं षड्विधमुक्तं यथा- १ संवृतः २ विवृत्तः ३ अस्पृष्टः ४ स्पृष्टः ५ ईषत्स्पृष्टः ६ अर्थस्पृष्टश्चेति।

सिद्धान्तकौमुद्यां चत्वारः आभ्यन्तरप्रयत्नाः अकथयत् श्रीभट्टोजि-दिक्षितमहोदयः। तत्र- **स्पृष्टप्रयत्नं स्पर्शानां ईषत्स्पृष्टमन्तस्थानां विवृतमूष्मणां स्वराणां च ह्रस्वस्य अवर्णस्य प्रयोगे संवृतं प्रक्रियादशायां तु विवृतमेव।** भट्टोजिदीक्षितः वर्णानां स्पर्शादि-संज्ञामपि स्पष्टयति यथा- **कादयो मावसानाः स्पर्शाः** (क आदिर्येषां ते कादयः म अवसाने येषां ते मावसानाः) अर्थात् क-वर्णात् म-वर्णान्तिपर्यन्तं वर्णा स्पर्शाः यरलवा अन्तस्थाः शषसह ऊष्माणः अचः स्वराः क ख इति प्रागर्धाविसर्गसदृशः जिह्वामूलीयः प फ इति प्रागधर्धाविसर्गसदृशः उपध्मानीय अं अः इत्यचः परावनुस्वारविसगौ।

**बाह्यप्रयत्नः-** वर्णानां मुखाद्बहिरागमनसमये या चेष्टा अथवा प्रयासो भवति तमेव **बाह्यप्रयत्नमुच्यते**। वाजसनेयप्रातिशाख्यस्य भाष्यकारेण उव्वटेन बाह्यप्रयत्नानां संक्षिप्तपरिचयं दत्तम्।

महोदयेन विवृतं, संवृतं, मध्यममिति भेदेन त्रयः प्रयत्नाः उल्लिखिताः। सिद्धान्तकौमुद्यानुसारेण बाह्यप्रयत्नस्य **एकादशभेदाः** यथा-

**प्रथमः विवारः-** विवारस्यार्थः भवति मुखस्य विकसनं विकासयति मुखमिति अर्थात् येषां वर्णानां उच्चारणे मुखोद्धाटनं। **द्वितीयः संवारः-** वर्णानामुच्चारणे मुखस्य स्वल्पविकासः संवारोच्यते। **तृतीयः श्वासः-** येषां वर्णानां उच्चारणे प्रश्वासश्चलति अर्थात् मुखादधिकवायुर्निगच्छति। **चतुर्थः नादः-** मधुरध्वनिः नादोच्यते। **पञ्चमः घोषः-** वर्णोच्चारणे गुन्जनं घोषः कथ्यते। **षष्ठः अघोषः-** गुञ्जनस्याभाव अघोषः उच्यते। **सप्तमः अल्पप्राणः-** वर्णाच्चारणे प्राणवायोः स्वल्यप्रयोग अल्पप्राणमुच्यते। **अष्टमः महाप्राणः-** वर्णोच्चारणे प्राणवायोधिकप्रयोगः महाप्राणोच्यते। **नवमः उदात्तः-** उच्चारणावयवानाम् उच्चभागैरुच्चारणमुदात्तः। **दशम अनुदात्तः-** उच्चारणावयवानां निम्नभागैरुच्चारणमनुदात्तः। **एकादशः स्वरितः-** समभागैरुच्चारणं स्वरितोच्यते।

वर्णेषु कादिपञ्चकं, चादिपञ्चकं, टादिपञ्चकं, तादिपञ्चकं, पादिपञ्चकं, एते पञ्चवर्गीयाः वर्णाः। वर्गाणां प्रथमद्वितीययोः अर्थात् **'खय्'** प्रत्याहारे आगतानां वर्णानां, तेषां यमानां, जिह्वामूलीयोपध्मानीययोः विसर्गस्य तथा **श् ष् स्** इत्येषां विवारः श्वासः अघोषश्च प्रयत्नः भवति। अन्येषां हश् प्रत्याहारे समागतानां वर्णानां संवारः नादः घोषश्च प्रयत्नाः भवन्ति। वर्गाणां प्रथमतृतीयपञ्चमवर्णानां तेषां यमानां, **य् व् र् ल्** इत्येषां च अल्पप्राण अन्येषां महाप्राणः प्रयत्न इति।

**वर्णोचारणशिक्षायाः प्रासंगिकता-** वर्णोचारणशिक्षायाः प्रासंगिकता वर्तमानैव न अपितु प्राचीनकालेऽप्यासीत्भाविकालेऽपि भविष्यति। यतोहि कस्यापि विषयस्य यथार्थ अथवा विशिष्टज्ञानप्राप्तये वर्णज्ञानं शुद्धोच्चारणादिकमेवाद्यसोपानमथवाधिकरणमस्तीति महाभाष्ये अपि पतञ्जलिना **'एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति'**[13] इत्युच्चरितम्। महर्षिदयानन्दसरस्वती वर्णोच्चारणशिक्षानामके ग्रन्थे वर्णोच्चारणशिक्षायाः फलम् कथयति **'अक्षराणां सम्यक् उच्चारणम् वाक्समानाय'**[14] अस्ति। अस्य (वर्णस्य) यथार्थज्ञानात् समेषां वेदानां फलम् प्राप्यते। वर्णानां सम्यगुच्चारणात् श्रवणे प्रीतिः भ्रमात् निवृत्तिश्च भवति, अतः वर्णोच्चारणविद्या अवश्यज्ञातव्येति। वर्तमाने वर्णोच्चारणशिक्षायाः प्रासंगिकतायाः विषये यानि कारणानि अत्र प्रतिपादितानि तानि प्रायः मुख्यानि शाश्वतानि सन्ति तेषां परिचयाय प्रयासो अत्र अधारूपेण प्रस्तुतो वर्तते।

**वेदादिग्रन्थानां सफलाध्ययनार्थम्-** आर्यधर्मस्य आर्यदर्शनस्य च जीवनं वेदा एव सन्ति। भारतीयसंस्कृतिः सभ्यता च तान् आधारीकृत्यैव विराजेते। सत्यानुसन्धातृभिः महर्षिदयानन्दादिभिः अनुभूतस्य परमतत्वस्य बोधायितारो भूत्वा भुवि ते विभान्ति । अस्माकं वेदाः एव संसारस्य समस्तज्ञानविज्ञानयोः स्रोतः भण्डारश्चेति ऋग्वेद्भाष्यभूमिकायां वेदविषयविचारप्रकरणे वेदस्य चत्वारः विषयाः विज्ञानकाण्डं, कर्मकाण्डं, उपासनाकाण्डं, ज्ञानकाण्डञ्च एतेषु विज्ञानकाण्डस्यैव प्रामुख्यं मत्वा स्वामीदयानन्दः कथयति- **'तत्र विज्ञानविषयो हि सर्वेभ्योः मुख्यास्ति तस्य परमेश्वरादारभ्यः तृणपर्यन्तं पदार्थेषु साक्षात् बोधान्वयत्वात् वेदेभ्यः अपूर्वज्ञानप्राप्तये वेदमन्त्राणां अर्थावगमनावश्यकं, अर्थावगमनाय मन्त्रेषु उच्चारितवर्णानां उच्चारणज्ञानमावश्यकं एवंप्रकारेण ज्ञायते यत् वेदेषु मन्त्रेषु प्रतिपादितं अनुसन्धानात्मज्ञानप्राप्तये वर्तमाने अपि वर्णोच्चारणशिक्षायाः प्रासंगिकतास्ति।'**[15]

**वर्णानां निर्दोषोच्चारणाय-** वर्णानां द्वादशप्रकारकाः दोषाः माहाभाष्यकारेणोक्तं यथा- **संवृतः कालो ध्मात एणीकृतः अम्बूकृतः अर्द्धको ग्रस्तो निरस्तः प्रगीतः उपगीतः विण्णो रोमशः इति। संवृतः-** संकुचितकण्ठेन वर्णोच्चारणं संवृतः । **कालः-** काकलप्रादेशात् वर्णोच्चारण कालदोषः। **ध्मातः** श्वासभूयिष्ठतया दीर्घभावेन वर्णाच्चिारणं ध्मातदोषेति। **एणीकृतः-** ओकारऔकारयोः मध्ये भेदज्ञानं विना उच्चारणे एणीकृतदोषः भवति। **अम्बुकृतः-** मुखस्यान्ते एवं वर्णोच्चारणे अम्बूकृतदोषः । **अर्द्धकः-** वर्णाच्चारणस्य नियतकालापेक्षा नियतादर्धकाले वर्णोच्चारणे अर्द्धकदोषः भवति । **ग्रस्तः-** जिह्वामूले संश्लिष्टस्वरोच्चारणं ग्रस्तः । **निरस्तः-** निष्ठुरोच्चारणं निरस्तः। **प्रगीतः-** गानं समोच्चारणम्। **उपगीतः-** त्वरया उच्चारणम्। **विण्णः-** कंपनयुक्तोच्चारणम्। **रोमशः-** गम्भीरोच्चारणम्।

उपरोक्त संवृत्तादिन् दोषान् अपसार्य गुणपूर्वकं शुद्धोच्चारणं भवेत् एतदर्थं वर्तमाने वर्णोच्चारणशिक्षायाः प्रासंगिकतास्ति। महर्षिदयानन्दादयः वाचकस्य गुणा अकथयन् यथा वर्णोच्चारणशिक्षायां वाचकगुणाः-

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥**[16]

**माधुर्यः-** वर्णोचारणे मधुरता भवेत्। **अक्षरव्यक्तः-** वर्णाच्चारणात् वर्णस्वरूपं स्पष्टं भवेत्। **पदच्छेदः-** पृथक् पृथक् पदस्य उच्चारणं भवेत्। **सुस्वरः-** सुन्दरध्वनियुक्तोच्चारणं भवेत्।**धैर्यं** - धैर्यपूर्वकं वर्णोच्चारणं भवेत्। **लयसमर्थं विरामः सार्थकता-** उचितलयविरामज्ञानपूर्वकं सार्थकोच्चारणं भवेत्। ह्रस्व-दीर्घ-प्लुतः, उदात्तअनुदात्त-स्वरितः, स्वरस्पर्शादिः आभ्यन्तरबाह्यप्रयत्नादिज्ञानपूर्वकं स्व स्वस्थानात् वर्णानामुच्चारणं तथा सत्यभाषणादयः एते वर्णोचारणकर्तृगुणाः सन्ति।

उदात्तादिस्वराणां यथायथं प्रयोगाय- इष्टार्थसम्पादनाय वर्णानां उदात्तानुदात्तस्वरितश्च प्रयोगज्ञानं भवेत् अन्यथा अनिष्टेनार्थेन विनाशोऽपि भवति। विषयेऽस्मिन् महाभाष्यकारः पतञ्जलिः तैतिरीयसंहितायाः द्वितीयकाण्डस्य पञ्चमप्रपाठके वर्णिता कथायाः संकेतमकरोत्। कथानुसारं त्वष्टर्षिः इन्द्रं हन्तुं अभिचारयागं कारयति। यागे मन्त्रप्रयोगकर्तृभिः स्वाहेन्द्रशत्रुवर्धस्व इत्यन्तोदात्ते प्रयोक्तव्यासीत् किन्तु तैराद्युदातः प्रयुक्तः येन तत्पुरुषार्थः बहुव्रीह्यर्थे परिवर्तितः। फलतः वृत्र इन्द्रेण हतः न तु इन्द्रः वृत्रेणेति महाभाष्ये –

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ।।**[17]

**सार्थकसम्प्रेषणाय-** मानव एकः सामाजिकप्राणि अस्ति। यः वर्तमाने सामाजिकव्यवहारकरणाय स्वविचारान् शब्दैः मौखिकेन लिखितेन च प्रकटयति अतः सार्थकसम्प्रेषणाय वाग्व्यवहाराय च वर्तमाने वर्णोच्चारणशिक्षायाः महती प्रासंगिकता विद्यते। यतोहि अशुद्धवर्णोच्चारणेन वक्ताभिप्रायं श्रोतारो नावगम्यन्ते यथा वक्ता कथयितुमिच्छति **'सः मम स्वजनोस्ति'** किन्त्वोच्चारणे स्वजनस्थाने श्वजनोच्चारणात् वाक्यार्थे परिवर्तनं भवति अर्थः भवति। सः मम श्वजनः अर्थात् मम कुकुरस्य सम्बन्धी अस्ति। वर्णोच्चारणदोषात् अयं अनर्थकरार्थागतः, एवमेव '**सः दिने सकृत् अत्ति**' वाक्यार्थी अस्ति अह्नि वारमेकं खादति किन्तु वाक्ये सकृत् पदस्यः स् वर्णस्थाने श् वर्णोच्चारणे सति उच्चारणात् वाक्यार्थानिर्थकः जातः तदार्थः भवति। सः दिने शकृत् खादति। अतः शुद्धोच्चारणशिक्षायै वर्तमानेऽपि वर्णोच्चारणशिक्षायाः प्रासंगिकता विद्यतेति।

**शुद्धरूपेण भाषायाः संरक्षणाय-** भाषा कस्यापि व्यक्तेः समाजस्य च परिचायिका भवति व्यक्तेः संस्कृतेः संवाहिका परिपोषिका च भाषैव भवति। अस्माकं भारतदेशे प्रचलिताः विविधाः भाषा अस्माकं संस्कृतेरुदात्तपरम्पराभ्य उत्कृष्ट्वेदादिज्ञानाय, विपुल-साहित्यसंरक्षणाय, नवज्ञानसृजनाय चावश्यकाः। अतः भाषायाः शुद्धरूपेण संरक्षणं परमावश्यकम्। प्राचीनकाले मौखिकरुपेण संरक्षणं भवति स्म। किन्तु वर्तमाने भाषायाः संरक्षणाय लेखनस्य प्रयोगः बृहदरूपेण भवति । भाषालेखने तदैव शुद्धता आगच्छति यदा वर्णानां शुद्धोच्चारणं भवति, अशुद्धोच्चारणात् लेखने दोषा आगच्छन्ति यस्माद् भाषायाः स्वरूपं वैकृतं भवति। अतः भारतीयभाषाणां शुद्धरूपेण संरक्षणं भवेयुः एतदर्थं वर्तमानेऽपि वर्णोच्चारणशिक्षायाः प्रासंगिकतास्तीति।

**निष्कर्षः-**

- प्रातिशाख्यादिषु शिक्षादिषु ग्रन्थेषु उच्चारणस्थानानां संख्याभेदाः सन्ति।
- सिद्धान्तकौमुद्यानुसारेण प्रयत्नानां द्वौ प्रकारौ स्तः। प्रयत्नः द्विधा आभ्यन्तरबाह्यश्च आभ्यन्तरप्रयत्नः 'अभि' इत्यस्य अन्तर शब्देन साकं 'प्रादयो गताद्यर्थे प्रथमया' अनेन समासत्वात् आभ्यन्तरशब्दः सम्पद्यते यस्यार्थः भवति अन्तरमभिगतमिति मध्यः, अन्तः, अन्तरालश्च अस्य पर्यायाः।
- ऋक्प्रातिशाख्ये आभ्यन्तरप्रयत्नानां त्रयः भेदाः - १ स्पृष्टः २ दुःस्पृष्ट ३ अस्पृष्टश्चेति । स्पृष्टप्रयत्नः स्पर्शसंज्ञकव्यञ्जनानामुक्त दुःस्पृष्टप्रयत्नः "य र ल व" इत्येषां वर्णानां कथितम्। अस्पृष्टप्रयत्नः स्वराणां, अनुस्वारस्य तथा ऊष्मवर्णानामुक्तम्।
- वाजसनेयप्रातिशाख्यस्य भाष्यकारेण उव्वटेन आभ्यन्तरस्य कृते आस्य शब्दप्रयुक्तः तथा आभ्यन्तरप्रयत्नानां षडङ्गः- १ संवृतः २ विवृत्तः ३ अस्पृष्टः ४ स्पृष्टः ५ ईषत्स्पृष्टः ६ अर्धस्पृष्टश्चेति।

**सन्दर्भितग्रन्थसूची-**


- श्रीवासुदेवदीक्षितप्रणीतया (२०१०); वैयाकरणसिद्धान्तकौमुदी-संपूर्णा; बालमनोरमाख्यया; श्रीज्ञानेन्द्रसरस्वतीविरचितया; तत्त्वबोधिन्याख्ययाव्याख्यया; मोतीलालबनारसीदास;वाराणसी.
- महर्षिपतञ्जलिविरचितं व्याकरणमहाभाष्यम्.
- श्रीमहर्षिपाणिनिप्रणीतः (२०१०):अष्टाध्यायीसूत्रपाठः;(दीक्षित-पुष्पाकृतप्रकरणनिर्देशसमन्वितः; संस्कृतभारती; नवदेहली.
- श्रीभर्तृहरिविरचितं (1961) वाक्यपदीयम्; चौखम्बासंस्कृत-सीरीज.वाराणसी.
- महर्षिपाणिनिप्रणीतः (1938) पाणिनीय-शिक्षा, मनमोहन-घोष, University of Calcutta, Calcutta.
- पाणिनिमुनिप्रणीता;दयानन्दसरस्वतीस्वामिकृतव्याख्या(२००९; वर्णोच्चारणशिक्षा; रामलालकपूरट्रस्ट; रेवली सोनीपत.


**कोशग्रन्थाः-**


१. अमरसिंह(१९६१);अमरकोशः;निर्णयसागरमुद्रणालयः; मुम्बई.

२. शब्दकल्पद्रुमः(१९६७); चौखम्बासंस्कृतग्रन्थमाला; वाराणसी.

३. वाचस्पत्यम्(१९६९), चौखम्बासंस्कृतग्रन्थमाला; वाराणसी.

४. अष्टाध्यायीपदानुक्रमकोशः(२००८);परिमलप्रकाशनम्; देहली.


**संदर्भ :**

1. महाभाष्यम् प.
2. महाभाष्यम् प.
3. वाक्य. ब्रह्म. १
4. पा.सू. ३.३.१०३
5. पा.शि. ३
6. पा.शि. ४,५
7. वाजसनेय प्रा. भा.
8. पा.शि.-१६,१७,१८
9. पा.सू.- १.१.९
10. सि.कौ.सं.प्र.
11. पा.सू.-३.३.९०
12. पा.सू.- २.२.१८
13. महाभाष्यम् प.
14. वर्णोच्चारणशिक्षा
15. ऋग्वेद्भाष्यभूमिका
16. वर्णोच्चारणशिक्षा- १८
17. महाभाष्यम् प.